**Series &RQPS**

**Set-4**

प्रश्न-पत्र कोड
Q.P. Code **22**

रोल नं.
Roll No. | | | | | | | | |

परीक्षार्थी प्रश्न-पत्र कोड को उत्तर-पुस्तिका के मुख-पृष्ठ पर अवश्य लिखें ।
Candidates must write the Q.P. Code on the title page of the answer-book.

# संस्कृतम् (केन्द्रिकम्)
# SANSKRIT (Core)

*समयोः : होरात्रयम्* | *पूर्णाङ्काः : **80***
*निर्धारित समय : **3** घण्टे* | *अधिकतम अंक : **80***
*Time allowed : **3** hours* | *Maximum Marks : **80***

| | **नोट** | | **NOTE** |
|---|---|---|---|
| (I) | कृपया जाँच कर लें कि इस प्रश्न-पत्र में मुद्रित पृष्ठ **19** हैं । | (I) | Please check that this question paper contains **19** printed pages. |
| (II) | कृपया जाँच कर लें कि इस प्रश्न-पत्र में **18** प्रश्न हैं । | (II) | Please check that this question paper contains **18** questions. |
| (III) | प्रश्न-पत्र में दाहिने हाथ की ओर दिए गए प्रश्न-पत्र कोड को परीक्षार्थी उत्तर-पुस्तिका के मुख-पृष्ठ पर लिखें । | (III) | Q.P. Code given on the right hand side of the question paper should be written on the title page of the answer-book by the candidate. |
| (IV) | **कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, उत्तर-पुस्तिका में प्रश्न का क्रमांक अवश्य लिखें ।** | (IV) | **Please write down the serial number of the question in the answer-book before attempting it.** |
| (V) | इस प्रश्न-पत्र को पढ़ने के लिए 15 मिनट का समय दिया गया है । प्रश्न-पत्र का वितरण पूर्वाह्न में 10.15 बजे किया जाएगा । 10.15 बजे से 10.30 बजे तक छात्र केवल प्रश्न-पत्र को पढ़ेंगे और इस अवधि के दौरान वे उत्तर-पुस्तिका पर कोई उत्तर नहीं लिखेंगे । | (V) | 15 minute time has been allotted to read this question paper. The question paper will be distributed at 10.15 a.m. From 10.15 a.m. to 10.30 a.m., the students will read the question paper only and will not write any answer on the answer-book during this period. |



Previous Pathshala

***General Instructions :***

*Question paper is divided into 4 sections.*

*It has total 18 questions.*

***Section A*** *– 1 Question no. 1 to 1*

***Section B*** *– 3 Questions no. 2 to 4*

***Section C*** *– 4 Questions no. 5 to 8*

***Section D*** *– 10 Questions no. 9 to 18*

*Attempt questions as per specific instructions.*

*Write question no. in answer book before attempting it.*

***सामान्य निर्देशाः***

*अस्मिन् प्रश्नपत्रे* ***चत्वारः*** *खण्डाः सन्ति ।*

*अस्मिन् प्रश्नपत्रे अष्टादश* ***(18)*** *प्रश्नाः सन्ति ।*

***खण्डः 'क'*** *– 1 – प्रश्नसंख्या 1*

***खण्डः 'ख'*** *– 3 – प्रश्नसंख्या 2 – 4*

***खण्डः 'ग'*** *– 4 – प्रश्नसंख्या 5 – 8*

***खण्डः 'घ'*** *– 10 – प्रश्नसंख्या 9 – 18*

*विशिष्ट-निर्देशानुसारं प्रश्नाः समाधेयाः ।*

*उत्तरपुस्तिकायां लेखनात् पूर्वं सर्वप्रथमं प्रश्नसंख्या लेखनीया ।*



Previous Pathshala

## खण्डः 'क'

## अपठितांश-अवबोधनम्

## अपठितांश अवबोधन

## Unseen Reading Comprehension

*10 अङ्काः*

**1.** अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत :

निम्नलिखित गद्यांश को पढ़कर दिये हुए प्रश्नों के उत्तर संस्कृत में लिखिए :

Read the following passage and answer the given questions in Sanskrit :

संस्कृतसाहित्ये भारतवर्षस्य गौरवं स्थाने-स्थाने वर्णितं वर्तते । भारतभूमिः तु कर्मभूमिः । देवाः अपि अस्याः गीतानि गायन्ति । भारतीयसंस्कृतेः आधारभूतं गुणद्वयम् वर्तते – त्यागः सेवा च । वयं संग्रहे विश्वासं न कुर्मः । अस्माकं श्रद्धा तु त्यागे एव । सर्वेषु मनुष्येषु एकः एव आत्मा । विविधजातिषु समुत्पन्नाः जनाः भारते निवसन्ति । यदि सर्वे स्वार्थभावनायाः त्यागं कुर्युः, सेवाभावनां च स्वीकुर्युः, तदा अस्माकं देशः पुनः स्वप्राचीनं गौरवपदं प्राप्नुयात् । देशे ऐक्यभावं वर्धयितुं श्रीशंकराचार्यः देशस्य चतुर्षु कोणेषु चत्वारि मठानि स्थापितवान् । एतानि मठानि भारते सांस्कृतिकचेतनायाः प्रसारम् अकुर्वन् । नूनम् आध्यात्मिकता एव ऐक्यभावनायुक्ता अस्य अमूल्या सम्पत्तिः । यदि एषा सम्पत्तिः विनश्यति तदा मानवतायाः एव विनाशः भविष्यति ।

**प्रश्नाः**

(अ) एकपदेन उत्तरत : (केवलं प्रश्नद्वयम्)
एक शब्द में उत्तर दीजिए : (केवल दो प्रश्न)
Answer in one word : (Only two questions) *2×1=2*

(i) भारतभूमिः कीदृशी भूमिः ?

(ii) अस्माकं का त्यागे एव ?

(iii) आध्यात्मिकता अस्य देशस्य कीदृशी सम्पत्तिः ?

(आ) पूर्णवाक्येन उत्तरत : (केवलं प्रश्नद्वयम्)
पूर्ण वाक्य में उत्तर दीजिए : (केवल दो प्रश्न)
Answer in a complete sentence : (Only two questions) *2×2=4*

(i) भारतीयसंस्कृतेः आधारभूतं गुणद्वयं किं वर्तते ?

(ii) कदा अस्माकं देशः पुनः स्वप्राचीनं गौरवपदं प्राप्नुयात् ?

(iii) कीदृशाः जनाः भारते निवसन्ति ?



Previous Pathshala

(इ) अस्य अनुच्छेदस्य द्वित्रिशब्दात्मकं (समुचितं) शीर्षकं लिखत ।

इस अनुच्छेद का दो या तीन शब्दों में उचित शीर्षक लिखिए ।

Write a suitable title for this passage in two or three words. *1×1=1*

(ई) यथानिर्देशम् उत्तरत : (केवलं प्रश्नत्रयम्)

निर्देशानुसार उत्तर दीजिए : (केवल तीन प्रश्न)

Answer as directed : (Only three questions) *3×1=3*

(i) 'गुणद्वयम्' इति पदस्य विशेषणपदं चिनुत :

(A) त्यागः

(B) आधारभूतम्

(C) भारतीयसंस्कृतेः

(D) अस्ति

(ii) 'देवाः' इति पदस्य क्रियापदम् चिनुत :

(A) अस्ति

(B) कुर्मः

(C) गायन्ति

(D) कुर्युः

(iii) 'स्थापितवान्' इति क्रियापदस्य कर्तृपदं चिनुत :

(A) जनाः

(B) एषा

(C) एतानि

(D) श्रीशंकराचार्यः

(iv) 'संग्रहः' इति पदस्य विपर्ययपदम् अत्र किं प्रयुक्तम् ?

(A) सेवा

(B) त्यागः

(C) सम्पत्तिः

(D) समुत्पन्नाः



Previous Pathshala

## खण्डः 'ख'

## रचनात्मक-कार्यम्

## रचनात्मक कार्य

## Writing Skills

*15 अङ्काः*

**2.** भवान्/भवती प्रधानाचार्यं प्रति सच्चरित्रप्रमाणपत्र-प्राप्त्यर्थं लिखिते पत्रे, मञ्जूषा-प्रदत्तशब्दैः रिक्तस्थानपूर्तिं कृत्वा पत्रं पुनः लिखतु ।

प्रधानाचार्य को अच्छे चरित्र प्रमाणपत्र प्राप्ति के लिए लिखे गये प्रार्थना-पत्र में मञ्जूषा में दिए गए शब्दों की सहायता से रिक्त स्थानों की पूर्ति करके प्रार्थना-पत्र को पुनः लिखिए ।

In an application written to the Principal for a good character certificate, you need to fill in the blanks with the help of the words given in the box below and rewrite the same. $10 \times \frac{1}{2} = 5$

**पत्रम्**

(i) ________________,

प्रधानाचार्यः

ज्ञान स्वरूप विद्यालयः, नव दिल्ली,

(ii) ______________

अहं सविनयं निवेदयामि यत् मम परीक्षा-परिणामः (iii) ____________ जातः । अहं द्वादशकक्षायां पञ्चाशीतिः प्रतिशतम् (iv) __________ प्राप्य उत्तीर्णवान् । सम्प्रति स्नातककक्षायाम् प्रवेशार्थं सच्चरित्रप्रमाणपत्रस्य (v) ____________ वर्तते । कृपया मह्यम् (vi) ____________ प्रदाय (vii) ___________ कुर्वन्तु । येन महाविद्यालये मदीयः (viii) ___________ सुलभः स्यात् । आशासे एतत् प्रमाणपत्रं (ix) ____________ प्राप्स्यति ।

धन्यवादाः ।

भवदीयः शिष्यः/भवदीया शिष्या

दिनाङ्कः _________ (x) _____________ ।

**मञ्जूषा**

| |
|---|
| महोदयाः, आवश्यकता, सेवायाम्, उद्घोषितः, सच्चरित्रप्रमाणपत्रम्, अनुगृहीतं, शीघ्रम्, श्यामः/श्यामा, प्रवेशः, अङ्कान् । |



Previous Pathshala

**3.** (क) मञ्जूषा-प्रदत्तशब्दानां सहायतया अधोलिखितायां लघुकथायां रिक्तस्थानानि पूरयित्वा कथां पुनः लिखत :

मंजूषा में दिये गए शब्दों की सहायता से नीचे लिखी लघुकथा में रिक्त स्थान भरकर कथा को पुनः लिखिए :

Complete the blanks of the following short story, with the help of the words given in the box below and rewrite the same : *$10\times\frac{1}{2}=5$*

दाक्षिणात्ये जनपदे (i) __________ नाम नगरम् आसीत् । तस्य समीपम् एकः (ii) __________ आसीत् । तत्र चित्रग्रीवः कपोतराजः (iii) __________ । एकदा कश्चिद् व्याधः तत्र आगच्छत् । सः वृक्षस्य (iv) __________ जालं प्रसारयति । उपरि च (v) __________ क्षिपति । तण्डुलान् (vi) __________ आगताः कपोताः जाले बद्धाः अभवन् । सर्वे कपोताः मिलित्वा (vii) __________ सह उदपतन् । ते जालं नीत्वा मूषकराजस्य (viii) __________ पार्श्वे अगच्छन् । सः तेषां (ix) __________ आसीत् । हिरण्यकः जालम् (x) __________ । एवं हि कपोताः मुक्ताः अभवन् ।

**मञ्जूषा**

| |
|---|
| हिरण्यकस्य, मित्रम्, भक्षयितुम्, अधः, विशालवृक्षः, महिलारोप्यम्, वसति स्म, जालेन, अकृन्तत्, तण्डुलकणान् । |

**अथवा**

(ख) अधोलिखित-संवादे रिक्तस्थानानि पूरयत :

निम्नलिखित संवाद में रिक्त स्थान भरिए :

Fill in the blanks in the following conversation : *5×1=5*

*सूर्यकान्तः* — किं जानासि चन्द्रिके ! अस्माकं देशस्य पूर्वनाम किम् आसीत् ।

*चन्द्रिका* — (i) ____________________ ।

*सूर्यकान्तः* — सत्यमुक्तम् आर्यावर्तस्य अर्थोऽस्ति-आर्याणां स्थानम् । अत्र आर्यशब्दस्य अर्थः कः ?



Previous Pathshala

*चन्द्रिका* — (ii) ____________________ ।

*सूर्यकान्तः* — शोभनम् । अत्र सर्वे श्रेष्ठाः जनाः एव निवसन्ति स्म । भारतं नाम केन नाम्ना सञ्जातम् ?

*चन्द्रिका* — (iii) ____________________ ।

*सूर्यकान्तः* — शोभनम् भरत नाम्ना एव ऋषभदेवस्य पुत्रः चक्रवर्ती राजा भरतः आसीत् । एकः अन्यः अपि भरतः आसीत् । सः कस्य पुत्रः आसीत् ?

*चन्द्रिका* — (iv) ____________________ ।

*सूर्यकान्तः* — आम् शोभनम् । दशरथस्य ज्येष्ठ पुत्रः रामः आसीत् । रामसीताभ्यां सह कः वनं गतवान् ?

*चन्द्रिका* — (v) ____________________ ।

*सूर्यकान्तः* — शोभनम् । लक्ष्मणेन तु वने भक्तिपूर्वकं सीतारामयोः सेवा कृता । चतुर्दशवर्षपर्यन्तं रामः वने उषित्वा रावणं हत्वा च अयोध्यां प्रतिनिवृत्तः आसीत् ।

**4.** अधोलिखितवाक्येषु केषाञ्चन **पञ्च**वाक्यानां संस्कृतेन अनुवादं कुरुत :
निम्नलिखित वाक्यों में से किन्हीं **पाँच** वाक्यों का संस्कृत में अनुवाद कीजिए :
Translate any **five** sentences in Sanskrit from the following sentences : *5×1=5*

(i) पुत्र अपने पिता के साथ गाँव जाता है ।
The son goes to the village with his father.

(ii) नदी के दोनों ओर वृक्ष हैं ।
There are trees on both sides of the river.

(iii) सरिता प्रतिदिन विद्यालय जाती है ।
Sarita goes to school everyday.

(iv) बालक कक्षा में श्लोक गाते हैं ।
The boys sing shlokas in class.



Previous Pathshala

(v) हम सब भ्रमण के लिए चण्डीगढ़ गये थे ।
We all went to Chandigarh for excursion.

(vi) दिव्या कल वाराणसी जाएगी ।
Divya will go to Varanasi tomorrow.

(vii) कनिका के पिता अध्यापक हैं ।
Kanika's father is a teacher.

**खण्डः 'ग'**

**अनुप्रयुक्त-व्याकरणम्** *20 अङ्काः*

**अनुप्रयुक्त-व्याकरण**

**Applied Grammar**

**5.** अधोलिखितवाक्येषु रेखाङ्कित-पदानां सन्धिच्छेदं सन्धिं वा कुरुत : (प्रश्नषट्कं केवलम्)
निम्नलिखित वाक्यों में रेखांकित पदों का सन्धि-विच्छेद अथवा सन्धि कीजिए : (केवल छः प्रश्न)
Disjoin or join sandhis in the underlined words of the following sentences : (Only six questions) : *6×1=6*

(i) <u>नास्ति</u> कोऽपि अवकाशः ।

(ii) तदाहं <u>जीवन् + अपि</u> मृतः ।

(iii) तत्किमपि <u>यथेच्छं</u> प्रच्छ ।

(iv) शठः <u>सहस्रैरपि</u> शिक्ष्यमाणः ।

(v) तद्वत् सुवर्णमिह <u>नैव</u> करोति नादम् ।

(vi) <u>एतदनुशासनम्</u> ।

(vii) <u>भोजश्चापि</u> चिरं प्रजाः पालितवान् ।



Previous Pathshala

**6.** अधोलिखितवाक्येषु रेखाङ्कित पदानाम् उचितं समस्तपदं विग्रहं वा प्रदत्तविकल्पेभ्यः चिनुत : (केवलं प्रश्नपञ्चकम्)

निम्नलिखित वाक्यों में रेखांकित पदों का उचित समस्त पद या उचित विग्रह को प्रदत्त विकल्पों से चुनिए : (केवल पाँच प्रश्न)

Select the appropriate expound from the given choices for the underlined words 'समस्तपद' or 'विग्रह' of the following sentences : (Only five questions) *5×1=5*

(i) अलूक्षाः धर्मकामाः स्युः ।

(A) लूक्षाः अनु

(B) न लूक्षाः

(C) लूक्षाभावः

(D) लूक्षस्य पश्चात्

(ii) सुमित्रामातः ! इतस्तावत् ।

(A) सुमित्रा मातः

(B) सुमित्रायै मातः

(C) सुमित्रा माता यस्य सः तत्सम्बुद्धौ

(D) सुमित्रायाः मातः

(iii) परस्परमनुव्रतौ पतिपत्न्यौ त्रिवर्गं साधयतः ।

(A) त्रीन् वर्गान्

(B) त्रयः वर्गाः यस्य सः तम्

(C) वर्गाणाम् त्रयम्

(D) त्रयाणाम् वर्गाणाम् समाहारः

(iv) सः एवमभिज्ञाय त्वया यथोचितं व्यवहरिष्यति ।

(A) यथा उचितम्

(B) उचितम् अनतिक्रम्य

(C) उचितं यथा

(D) उचितस्य पश्चात्



Previous Pathshala

(v) स्वयमेव कुलगुरुं <u>पितरौ</u> च सभाजयितुं गमिष्याव: ।

(A) माता च पिता च

(B) मातु: च पितु: च

(C) पिता च पिता च

(D) मात्रा च पित्रा च

(vi) इमां भविष्यवाणीं निशम्य मुञ्जो <u>विच्छायवदन:</u> अभूत् ।

(A) विच्छायम् वदनम् यस्य स:

(B) विच्छाय: च वदन: च

(C) विच्छायम् अनतिक्रम्य

(D) विच्छायेन वदनेन स:

(vii) इत्यासीत् <u>गुरो: पादानां</u> मतम् ।

(A) गुरुपादानाम्

(B) गुरुपादाय

(C) गुरवेपादम्

(D) गुरुपादम्

**7.** अधोलिखितवाक्येषु रेखाङ्कितपदानां समुचितं संयोजितं विभाजितं वा प्रकृति-प्रत्यययोगं प्रदत्त-विकल्पेभ्य: चिनुत : (केवलं प्रश्नषट्कम्)

निम्नलिखित वाक्यों में रेखांकित पदों के उपयुक्त संयुक्त अथवा विभक्त प्रकृति-प्रत्यय योग को दिए हुए विकल्पों में से चुनिए : (केवल छ: प्रश्न)

From the given choices, choose the correct combination of joint or disjoint set of suffix for the underlined words in the following sentences : (Only six questions) *6×1=6*

(i) कृतालङ्कारभूतो <u>गत:</u> ।

(A) गम् + क्त

(B) गम् + क्तवतु

(C) गम् + तव्यत्

(D) गम् + अनीयर्



Previous Pathshala

(ii) युधिष्ठिरः तां द्यूते <u>हृ + णिच् + क्तवतु</u> ।

(A) हृतवान्

(B) हर्तवान्

(C) हारितवान्

(D) हारितम्

(iii) सिद्धोऽहं <u>बलवान्</u> सुखी ।

(A) बल + मतुप्

(B) बल + क्तवतु

(C) बल + तल्

(D) बल + तव्यत्

(iv) तदाहं <u>जीवन्</u> अपि मृतः ।

(A) जीव् + शतृ

(B) जीव् + शानच्

(C) जीव् + क्त

(D) जीव् + तव्यत्

(v) शठः सहस्रैरपि <u>शिक्ष्यमाणः</u> ।

(A) शिक्ष् + मतुप्

(B) शिक्ष् + शानच्

(C) शिक्ष् + वतुप्

(D) शिक्ष् + शतृ

(vi) <u>राजकुमार + ङीप्</u> सर्वविद्या निष्णाता जाता ।

(A) राजकुमारी

(B) राजकुमार्यः

(C) राजकुमारि

(D) राजकुमारीणाम्



Previous Pathshala

(vii) अत्रभवन्तः नारी-<u>स्वाधीनताम्</u> अधिकृत्य किं कथयन्ति ?

(A) स्वाधीन + टाप्

(B) स्वाधीन + तल्

(C) स्वाधीन + क्तवतु

(D) स्वाधीन + क्त

**8.** समुचितम् उपपद-विभक्तिरूपं चिनुत । (केवलं प्रश्नत्रयम्)

उपयुक्त उपपद-विभक्ति रूप को चुनिए । (केवल तीन प्रश्न)

Choose the appropriate subordinate clause form. (Only three questions) *3×1=3*

(i) _______ न प्रमदितव्यम् ।

(A) कुशलाय

(B) कुशलेन

(C) कुशलात्

(D) कुशलम्

(ii) हा ! धिक् _______ ।

(A) अस्मात्

(B) अस्मान्

(C) अस्मभ्यम्

(D) अस्माकम्

(iii) महाराज शिववीरस्य _______ वयं शिरसा वहामः ।

(A) आज्ञा

(B) आज्ञाम्

(C) आज्ञया

(D) आज्ञायाः

(iv) किं गुरुवर्यैः _______ अधिकृत्य पित्रे कथितम् ?

(A) माम्

(B) अहम्

(C) मह्यम्

(D) मम



Previous Pathshala

## खण्डः 'घ'

## (i) पठितावबोधनम्

## पठित-अवबोधन

## Reading Comprehension

*25 अङ्काः*

**9.** अधोलिखितं गद्यांशं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत :
निम्नलिखित गद्यांश को पढ़कर उस पर आधारित प्रश्नों के उत्तर संस्कृत में दीजिए :
Read the following prose passage and answer the questions based on them in Sanskrit : *5*

मातृदेवो भव । पितृदेवो भव । आचार्यदेवो भव । अतिथिदेवो भव । यानि अनवद्यानि कर्माणि, तानि सेवितव्यानि, नो इतराणि । यान्यस्माकं सुचरितानि तानि त्वयोपास्यानि, नो इतराणि । अथ यदि ते कर्मविचिकित्सा वा वृत्तविचिकित्सा वा स्यात् । ये तत्र ब्राह्मणाः सम्मर्शिनः, युक्ता आयुक्ताः, अलूक्षाः धर्मकामाः स्युः, यथा ते तत्र वर्तेरन् तथा तत्र वर्तेथाः । एष आदेशः । एष उपदेशः । एषा वेदोपनिषत् ।

**प्रश्नाः**

(अ) एकपदेन उत्तरत : (केवलं प्रश्नद्वयम्)
एक शब्द में उत्तर दीजिए : (केवल दो प्रश्न)
Answer in one word : (Only two questions) $2\times\frac{1}{2}=1$

(i) पिता कः भव ?

(ii) इतराणि (निन्द्यानि) कानि न सेवितव्यानि ?

(iii) एषा का ?

(आ) पूर्णवाक्येन उत्तरत : (केवलं प्रश्नद्वयम्)
पूर्ण वाक्य में उत्तर दीजिए : (केवल दो प्रश्न)
Answer in a complete sentence : (Only two questions) $2\times1=2$

(i) ब्राह्मणाः कीदृशाः स्युः ?

(ii) कीदृशानि कर्माणि सेवितव्यानि ?

(iii) कानि त्वयोपास्यानि ?

(इ) यथानिर्देशम् उत्तरत : (केवलं प्रश्नद्वयम्)
निर्देशानुसार उत्तर दीजिए : (केवल दो प्रश्न)
Answer as directed : (Only two questions) $2\times1=2$

(i) 'वर्तेरन्' इति क्रियापदस्य कर्तृपदं किम् ?

(ii) 'कर्माणि' इति पदस्य विशेषणपदं किम् ?

(iii) 'दुश्चरितानि' इति पदस्य विपर्ययपदं किम् ?



Previous Pathshala

**10.** अधोलिखितं पद्यं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत :

निम्नलिखित पद्य को पढ़कर उस पर आधारित प्रश्नों के उत्तर संस्कृत में दीजिए :

Read the following poetry and answer the questions based on them in Sanskrit : *5*

गुणी गुणं वेत्ति न वेत्ति निर्गुणः,
बली बलं वेत्ति न वेत्ति निर्बलः ।
पिको वसन्तस्य गुणं न वायसः,
करी च सिंहस्य बलं न मूषकः ।।

**प्रश्नाः**

(अ) एकपदेन उत्तरत : (केवलं प्रश्नद्वयम्)

एक शब्द में उत्तर दीजिए : (केवल दो प्रश्न)

Answer in one word : (Only two questions) $2\times\frac{1}{2}=1$

(i) गुणी कं वेत्ति ?

(ii) पिकः कस्य गुणं जानाति ?

(iii) निर्बलः कं न वेत्ति ?

(आ) पूर्णवाक्येन उत्तरत : (केवलं प्रश्नद्वयम्)

पूर्ण वाक्य में उत्तर दीजिए : (केवल दो प्रश्न)

Answer in a complete sentence : (Only two questions) $2\times1=2$

(i) सिंहस्य बलं कः न जानाति ?

(ii) सिंहस्य बलं कः जानाति ?

(iii) वायसः कस्य गुणं न जानाति ?

(इ) यथानिर्देशम् उत्तरत : (केवलं प्रश्नद्वयम्)

निर्देशानुसार उत्तर दीजिए : (केवल दो प्रश्न)

Answer as directed : (Only two questions) $2\times1=2$

(i) 'काकः' इति पदस्य पर्यायपदं किम् ?

(ii) 'निर्बलः' इति पदस्य विपर्ययपदं किम् ?

(iii) 'गुणी' इति कर्तृपदस्य क्रियापदं किम् ?



Previous Pathshala

**11.** अधोलिखितं नाट्यांशं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत :

निम्नलिखित नाट्यांश को पढ़कर उस पर आधारित प्रश्नों के उत्तर संस्कृत में दीजिए :

Read the following part of a drama and answer the questions based on it in Sanskrit : *5*

*मदालसा* — (हसित्वा) नहि जानन्ति ते यदहं तु विवाहबन्धनं स्वीकर्तुं न इच्छामि ।

*कुण्डला* — किं करिष्यसि तदा ?

*मदालसा* — ब्रह्मवादिनी भविष्यामि । आचार्येति पदं प्राप्य शिष्येभ्य: जीवनकलां शिक्षयिष्यामि ।

*कुण्डला* — जाने तेऽभिरुचिम् अध्ययने अध्यापने च । परं यथा लतेयं सहकारमवलम्बते तथैव नारी जीवनयात्रायां कमपि सहचरम् अपेक्षते य: तस्या: अवलम्बनं स्यात् ।

*मदालसा* — नास्ति मत्कृते आवश्यकता अवलम्बनस्य । स्वयं समर्था जीवनपथे चलितुमहं न कस्यापि सङ्केतै: नर्तितुं पारयामि ।

*कुण्डला* — नर्तिष्यसि तदा एकाकिनी एव ।

*मदालसा* — (विहस्य) यदि त्वं शीघ्रमेव पतिगृहं गमिष्यसि तदा एकाकिनी भविष्यामि परम् एक: उपाय: अपि चिन्तित: मया ।

*कुण्डला* — क: उपाय: ?

*मदालसा* — सङ्गीत साहित्य-माध्यमेन ब्रह्मविद्यां सरसां विधाय बहुभ्य: शिशुभ्य: शिक्षणं प्रदास्यामि ।

**प्रश्ना:**

(अ) एकपदेन उत्तरत : (केवलं प्रश्नद्वयम्)

एक शब्द में उत्तर दीजिए : (केवल दो प्रश्न)

Answer in one word : (Only two questions) $2\times\frac{1}{2}=1$

(i) मदालसा का भविष्यति ?

(ii) लता कम् अवलम्बते ?

(iii) मदालसा कस्य आवश्यकतां न अनुभवति ?

(आ) पूर्णवाक्येन उत्तरत : (केवलं प्रश्नद्वयम्)

पूर्ण वाक्य में उत्तर दीजिए : (केवल दो प्रश्न)

Answer in a complete sentence : (Only two questions) $2\times1=2$

(i) मदालसा हसित्वा स्वविवाहविषये कुण्डलां प्रति किं कथयति ?

(ii) मदालसा आचार्येति पदं प्राप्य किं करिष्यति ?

(iii) नारी जीवनयात्रायां किम् अपेक्षते ?



Previous Pathshala

(इ) यथानिर्देशम् उत्तरत : (केवलं प्रश्नद्वयम्)

निर्देशानुसार उत्तर दीजिए : (केवल दो प्रश्न)

Answer as directed : (Only two questions) *2×1=2*

(i) 'गमिष्यसि' इति क्रियापदस्य कर्तृपदं किं प्रयुक्तम् ?

(ii) 'बहुभ्य:' इति विशेषणपदस्य विशेष्यपदं किम् ?

(iii) 'अहम् न कस्यापि सङ्केतै: नर्तितुं पारयामि' अत्र वाक्ये 'अहम्' इति सर्वनामपदं कस्मै प्रयुक्तम् ?

**12.** (क) अधोलिखितस्य पद्यस्य भावार्थं मञ्जूषाप्रदत्त-शब्दै: पूरयित्वा पुन: लिखत :
निम्नलिखित पद्य का भावार्थ मञ्जूषा में दिए गए शब्दों से भरकर पुन: लिखिए :

Rewrite the gist of the following verse by filling it with the help of the words given in the box : *3×1=3*

त्रैलोक्यं दग्धुकामेव, ललाटपुटसंस्थिता ।
भृकुटिर्लक्ष्मणस्यैषा, नियतीव व्यवस्थिता ।।

**भावार्थ:**

सौमित्रस्य एषा (i) ___________ स्थिता भृकुटि: सर्वां । (ii) _____________ दग्धुमिच्छन्ती नियति: इव । (iii) ___________ अस्ति ।

**मञ्जूषा**

| भुवं, मस्तकमध्ये, सुस्थिता । |
|---|

**अथवा (OR)**

(ख) प्रदत्तभावार्थत्रयात् शुद्धं भावार्थं चित्वा लिखत :
दिए हुए तीन भावार्थों में से शुद्ध भावार्थ चुनकर लिखिए :
Write the correct essence from three essences of the following each part :

(अ) 'अनन्यशासनामुर्वीं शशासैकपुरीमिव ।'

(i) न अन्यशासकेन शासितां पृथ्वीम् एकपुरीमिव शासनं चकार ।

(ii) अन्यशासकेन शासितां वसुधां शशास ।

(iii) स्वशासकेन शासितं नगरं रक्षितवान् ।



Previous Pathshala

(आ) 'मया दृढं परीक्षितोऽसि ।'

(i) मया त्वं परीक्ष्यसे ।

(ii) त्वं मम परीक्षां करोषि ।

(iii) अहं तव कठिनपरीक्षां कृतवान् ।

(इ) 'इदमस्तीदमपि मे भविष्यति पुनर्धनम् ।'

(i) मम पार्श्वे एतन्मात्रं धनमस्ति, परम् इतः अत्यधिकमपि धनम् अहं प्राप्स्यामि ।

(ii) इदं वस्तु ममास्ति अन्यमपि मम एव स्यात् ।

(iii) इदमस्ति इति चिन्तयित्वा कोऽपि सन्तुष्टः न भवति ।

**13.** अधोलिखित-श्लोकस्य प्रदत्ते अन्वये रिक्तस्थानानि मञ्जूषाप्रदत्त-शब्दानां सहायतया पूरयत :

निम्नलिखित श्लोक के दिये हुए अन्वय में रिक्त स्थानों की पूर्ति मञ्जूषा में दिए गए शब्दों की सहायता से कीजिए :

The prose-order rendering of the following verse is given. Fill in the blanks with the help of words given in the box : *3×1=3*

अक्षोभ्यः क्षोभितः केन, लक्ष्मणो धैर्यसागरः ।
येन रुष्टेन पश्यामि, शताकीर्णमिवाग्रतः ।।

**अन्वयः**

केन अक्षोभ्यः (i) ____________ लक्ष्मणः क्षोभितः येन (ii) ____________ शताकीर्णम् इव (iii) ____________ पश्यामि ।

**मञ्जूषा**

| रुष्टेन, धैर्यसागरः, अग्रतः । |
|---|



Previous Pathshala

**14.** 'क' स्तम्भस्य वाक्यानां 'ख' स्तम्भस्य उपयुक्तवाक्यैः सह मेलनं कुरुत ।
'क' स्तम्भ के वाक्यों का 'ख' स्तम्भ के उपयुक्त वाक्यों के साथ मिलान कीजिए ।
Match the sentences of column 'क' with suitable sentences of column 'ख'. $4\times\frac{1}{2}=2$

| *'क' स्तम्भः* | | *'ख' स्तम्भः* | |
|---|---|---|---|
| i. | ईश्वरोऽहमहं भोगी | 1. | नूनं त्वया यास्यति । |
| ii. | अपि श्रुताः भवद्भिः | 2. | सिद्धोऽहं बलवान् सुखी । |
| iii. | विशेषतः सर्वविदां समाजे | 3. | मम सखीविचाराः । |
| iv. | नैकेनापि समं गता वसुमती | 4. | विभूषणं मौनमपण्डितानाम् । |

**15.** अधोलिखितवाक्येषु रेखाङ्कित-पदानां प्रसङ्गानुसारं शुद्धम् अर्थं मञ्जूषातः चित्वा लिखत :
निम्नलिखित वाक्यों में रेखांकित पदों का प्रसंगानुसार शुद्ध अर्थ मञ्जूषा से चुनकर लिखिए :
Choose and write the appropriate meanings of the underlined words in the following sentences with the help of the words given in the box : $4\times\frac{1}{2}=2$

(i) यदि ते कर्मविचिकित्सा वा ।

(ii) रोदितव्ये काले सौमित्रिणा धनुर्गृहीतम् ।

(iii) त्यागाय संभृतार्थानां सत्याय मितभाषिणाम् ।

(iv) सेतुर्येन महोदधौ विरचितः क्वासौ दशास्यान्तकः ।

**मञ्जूषा**

| रावणनाशकः, कर्मसन्देहः, लक्ष्मणेन, अल्पभाषिणाम् |
|---|

## (ii) संस्कृतसाहित्यस्य सामान्यपरिचयः *10 अङ्काः*
## संस्कृत साहित्य का सामान्य परिचय
## General Introduction to Sanskrit Literature

**16.** अधोलिखितप्रश्नानाम् उत्तराणि लिखत : (केवलं प्रश्नत्रयम्)
निम्नलिखित प्रश्नों के उत्तर लिखिए : (केवल तीन प्रश्न)
Answer the following questions : (Only three questions) $3\times1=3$

(i) 'नैकेनापि समं गता वसुमती' इत्यस्य पाठस्य सन्दर्भग्रन्थः कः ?



Previous Pathshala

(ii) श्रीमद्भगवद्-गीताया: लेखक: क: ?

(iii) 'मदालसा' पाठस्य लेखिका का ?

(iv) 'शिवराजविजयम्' इति ग्रन्थस्य रचनाकार: क: ?

**17.** मञ्जूषायां प्रदत्तशब्दानां साहाय्येन रिक्तस्थानानि पूरयित्वा लिखत । (केवलं प्रश्नत्रयम्)

मञ्जूषा में दिये गये शब्दों की सहायता से रिक्त स्थानों की पूर्ति करके लिखिए । (केवल तीन प्रश्न)

Fill in the blanks with the help of the words given in the box.

(Only three questions) *3×1=3*

(i) नान्दी नाटकस्य _______ भवति ।

(ii) 'कादम्बरी' इति ग्रन्थस्य लेखक: _______ अस्ति ।

(iii) छन्दोरहिता रचना _______ कथ्यते ।

(iv) कालिदासेन रचितं 'मेघदूतम्' _______ अस्ति ।

**मञ्जूषा**

| |
|---|
| गद्यम्, बाणभट्ट:, खण्डकाव्यम्, प्रारम्भे । |

**18.** समुचितं मेलयत :

समुचित मिलान कीजिए :

Match properly : *4×1=4*

| | | | |
|---|---|---|---|
| i. | स्वप्नवासवदत्तम् | 1. | भरतमुनि: |
| ii. | नाट्यशास्त्रम् | 2. | महाकवि: भास: |
| iii. | नाटकस्य प्रधानम् अङ्गम् | 3. | विदूषक: |
| iv. | हास्यकलाकार: | 4. | अभिनय: |



Previous Pathshala